# ॐ श्री परमात्मने नमः। अथ त्रयोदशोऽध्यायः। क्षेत्रक्षेत्रज्ञविभागयोगः।

| | |
|---|---|
| अर्जुन उवाच<br>प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च।<br>एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव॥ १॥ | मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।<br>विविक्तदेशसेवित्वम् अरतिर्जनसंसदि॥ ११॥ |
| श्रीभगवानुवाच<br>इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।<br>एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः॥ २॥ | अध्यात्मज्ञाननित्यत्वम् तत्त्वज्ञानार्थदर्शनम्।<br>एतज्ज्ञानमिति प्रोक्तम् अज्ञानं यदतोऽन्यथा॥ १२॥ |
| क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।<br>क्षेत्रक्षेत्रज्ञयोर्ज्ञानम् यत्तज्ज्ञानं मतं मम॥ ३॥ | ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते।<br>अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते॥ १३॥ |
| तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत्।<br>स च यो यत्प्रभावश्च तत्समासेन मे शृणु॥ ४॥ | सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्।<br>सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥ १४॥ |
| ऋषिभिर्बहुधा गीतम् छन्दोभिर्विविधैः पृथक्।<br>ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः॥ ५॥ | सर्वेन्द्रियगुणाभासम् सर्वेन्द्रियविवर्जितम्।<br>असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥ १५॥ |
| महाभूतान्यहङ्कारः बुद्धिरव्यक्तमेव च।<br>इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः॥ ६॥ | बहिरन्तश्च भूतानाम् अचरं चरमेव च।<br>सूक्ष्मत्वात्तदविज्ञेयम् दूरस्थं चान्तिके च तत्॥ १६॥ |
| इच्छा द्वेषः सुखं दुःखम् संघातश्चेतना धृतिः।<br>एतत्क्षेत्रं समासेन सविकारमुदाहृतम्॥ ७॥ | अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।<br>भूतभर्तृ च तज्ज्ञेयम् ग्रसिष्णु प्रभविष्णु च॥ १७॥ |
| अमानित्वमदम्भित्वम् अहिंसा क्षान्तिरार्जवम्।<br>आचार्योपासनं शौचम् स्थैर्यमात्मविनिग्रहः॥ ८॥ | ज्योतिषामपि तज्ज्योतिः तमसः परमुच्यते।<br>ज्ञानं ज्ञेयं ज्ञानगम्यम् हृदि सर्वस्य विष्ठितम्॥ १८॥ |
| इन्द्रियार्थेषु वैराग्यम् अनहङ्कार एव च।<br>जन्ममृत्युजराव्याधि- दुःखदोषानुदर्शनम्॥ ९॥ | इति क्षेत्रं तथा ज्ञानम् ज्ञेयं चोक्तं समासतः।<br>मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते॥ १९॥ |
| असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।<br>नित्यं च समचित्तत्वम् इष्टानिष्टोपपत्तिषु॥ १०॥ | प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।<br>विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्॥ २०॥ |

| | |
|---|---|
| कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते।<br>पुरुषः सुखदुःखानाम् भोक्तृत्वे हेतुरुच्यते॥२१॥ | समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम्।<br>न हिनस्त्यात्मनात्मानम् ततो याति परां गतिम्॥२९॥ |
| पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान्।<br>कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु॥२२॥ | प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।<br>यः पश्यति तथात्मानम् अकर्तारं स पश्यति॥३०॥ |
| उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः।<br>परमात्मेति चाप्युक्तः देहेऽस्मिन् पुरुषः परः॥२३॥ | यदा भूतपृथग्भावम् एकस्थमनुपश्यति।<br>तत एव च विस्तारम् ब्रह्म सम्पद्यते तदा॥३१॥ |
| य एवं वेत्ति पुरुषम् प्रकृतिं च गुणैः सह।<br>सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते॥२४॥ | अनादित्वान्निर्गुणत्वात् परमात्मायमव्ययः।<br>शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥३२॥ |
| ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।<br>अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे॥२५॥ | यथा सर्वगतं सौक्ष्म्यात् आकाशं नोपलिप्यते।<br>सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥३३॥ |
| अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते।<br>तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः॥२६॥ | यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।<br>क्षेत्रं क्षेत्री तथा कृत्स्नम् प्रकाशयति भारत॥३४॥ |
| यावत्सञ्जायते किञ्चित् सत्त्वं स्थावरजङ्गमम्।<br>क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ॥२७॥ | क्षेत्रक्षेत्रज्ञयोरेवम् अन्तरं ज्ञानचक्षुषा।<br>भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्॥३५॥ |
| समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।<br>विनश्यत्स्वविनश्यन्तम् यः पश्यति स पश्यति॥२८॥ | |

ॐ तत् सत्

इति श्रीमद् भगवद् गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे

क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः॥

om śrī paramātmane namaḥ.    atha trayodaśo'dhyāyaḥ.

# kṣetrakṣetrajñavibhāgayogaḥ.

| | | |
|---|---|---|
| arjuna uvāca<br>prakṛtiṁ puruṣaṁ caiva<br>kṣetraṁ kṣetrajñameva ca<br>etadveditumicchāmi<br>jñānaṁ jñeyaṁ ca keśava 1 | icchā dveṣaḥ sukhaṁ duḥkham<br>saṁghātaścetanā dhṛtiḥ<br>etatkṣetraṁ samāsena<br>savikāramudāhṛtam 7 | jñeyaṁ yattatpravakṣyāmi<br>yajjñātvāmṛtamaśnute<br>anādimatparaṁ brahma<br>na sattannāsaducyate 13 |
| śrībhagavānuvāca<br>idaṁ śarīraṁ kaunteya<br>kṣetramityabhidhīyate<br>etadyo vetti taṁ prāhuḥ<br>kṣetrajña iti tadvidaḥ 2 | amānitvamadambhitvam<br>ahiṁsā kṣāntirārjavam<br>ācāryopāsanaṁ śaucam<br>sthairyamātmavinigrahaḥ 8 | sarvataḥ pāṇipādaṁ tat<br>sarvato'kṣiśiromukham<br>sarvataḥ śrutimalloke<br>sarvamāvṛtya tiṣṭhati 14 |
| kṣetrajñaṁ cāpi māṁ viddhi<br>sarvakṣetreṣu bhārata<br>kṣetrakṣetrajñayorjñānam<br>yattajjñānaṁ mataṁ mama 3 | indriyārtheṣu vairāgyam<br>anahaṅkāra eva ca<br>janmamṛtyujarāvyādhi-<br>duḥkhadoṣānudarśanam 9 | sarvendriyaguṇābhāsam<br>sarvendriyavivarjitam<br>asaktaṁ sarvabhṛccaiva<br>nirguṇaṁ guṇabhoktṛ ca 15 |
| tatkṣetraṁ yacca yādṛk ca<br>yadvikāri yataśca yat<br>sa ca yo yatprabhāvaśca<br>tatsamāsena me śṛṇu 4 | asaktiranabhiṣvaṅgaḥ<br>putradāragṛhādiṣu<br>nityaṁ ca samacittatvam<br>iṣṭāniṣṭopapattiṣu 10 | bahirantaśca bhūtānām<br>acaraṁ carameva ca<br>sūkṣmatvāttadavijñeyam<br>dūrasthaṁ cāntike ca tat 16 |
| ṛṣibhirbahudhā gītam<br>chandobhirvividhaiḥ pṛthak<br>brahmasūtrapadaiścaiva<br>hetumadbhirviniścitaiḥ 5 | mayi cānanyayogena<br>bhaktiravyabhicāriṇī<br>viviktadeśasevitvam<br>aratirjanasaṁsadi 11 | avibhaktaṁ ca bhūteṣu<br>vibhaktamiva ca sthitam<br>bhūtabhartṛ ca tajjñeyam<br>grasiṣṇu prabhaviṣṇu ca 17 |
| mahābhūtānyahaṅkāraḥ<br>buddhiravyaktameva ca<br>indriyāṇi daśaikaṁ ca<br>pañca cendriyagocarāḥ 6 | adhyātmajñānanityatvam<br>tattvajñānārthadarśanam<br>etajjñānamiti proktam<br>ajñānaṁ yadato'nyathā 12 | jyotiṣāmapi tajjyotiḥ<br>tamasaḥ paramucyate<br>jñānaṁ jñeyaṁ jñānagamyam<br>hṛdi sarvasya viṣṭhitam 18 |

| | | |
|---|---|---|
| iti kṣetraṁ tathā jñānam<br>jñeyaṁ coktaṁ samāsataḥ<br>madbhakta etadvijñāya<br>madbhāvāyopapadyate 19 | dhyānenātmani paśyanti<br>kecidātmānamātmanā<br>anye sāṅkhyena yogena<br>karmayogena cāpare 25 | yadā bhūtapṛthagbhāvam<br>ekasthamanupaśyati<br>tata eva ca vistāram<br>brahma sampadyate tadā 31 |
| prakṛtiṁ puruṣaṁ caiva<br>viddhyanādī ubhāvapi<br>vikārāṁśca guṇāṁścaiva<br>viddhi prakṛtisaṁbhavān 20 | anye tvevamajānantaḥ<br>śrutvānyebhya upāsate<br>te'pi cātitarantyeva<br>mṛtyuṁ śrutiparāyaṇāḥ 26 | anāditvānnirguṇatvāt<br>paramātmāyamavyayaḥ<br>śarīrastho'pi kaunteya<br>na karoti na lipyate 32 |
| kāryakaraṇakartṛtve<br>hetuḥ prakṛtirucyate<br>puruṣaḥ sukhaduḥkhānām<br>bhoktṛtve heturucyate 21 | yāvatsañjāyate kiñcit<br>sattvaṁ sthāvarajaṅgamam<br>kṣetrakṣetrajñasaṁyogāt<br>tadviddhi bharatarṣabha 27 | yathā sarvagataṁ saukṣmyāt<br>ākāśaṁ nopalipyate<br>sarvatrāvasthito dehe<br>tathātmā nopalipyate 33 |
| puruṣaḥ prakṛtistho hi<br>bhuṅkte prakṛtijānguṇān<br>kāraṇaṁ guṇasaṅgo'sya<br>sadasadyonijanmasu 22 | samaṁ sarveṣu bhūteṣu<br>tiṣṭhantaṁ parameśvaram<br>vinaśyatsvavinaśyantam<br>yaḥ paśyati sa paśyati 28 | yathā prakāśayatyekaḥ<br>kṛtsnaṁ lokamimaṁ raviḥ<br>kṣetraṁ kṣetrī tathā kṛtsnam<br>prakāśayati bhārata 34 |
| upadraṣṭānumantā ca<br>bhartā bhoktā maheśvaraḥ<br>paramātmeti cāpyuktaḥ<br>dehe'smin puruṣaḥ paraḥ 23 | samaṁ paśyanhi sarvatra<br>samavasthitamīśvaram<br>na hinastyātmanātmānam<br>tato yāti parāṁ gatim 29 | kṣetrakṣetrajñayorevam<br>antaraṁ jñānacakṣuṣā<br>bhūtaprakṛtimokṣaṁ ca<br>ye viduryānti te param 35 |
| ya evaṁ vetti puruṣam<br>prakṛtiṁ ca guṇaiḥ saha<br>sarvathā vartamāno'pi<br>na sa bhūyo'bhijāyate 24 | prakṛtyaiva ca karmāṇi<br>kriyamāṇāni sarvaśaḥ<br>yaḥ paśyati tathātmānam<br>akartāraṁ sa paśyati 30 | |

om tat sat

iti śrīmad bhagavad gītāsu upaniṣatsu brahmavidyāyāṁ yogaśāstre
śrīkṛṣṇārjunasaṁvāde kṣetrakṣetrajñavibhāgayogo nāma trayoadaśo'dhyāyaḥ.